श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमद्वेदान्तदेशिक सुप्रभातम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमद्वेदान्तदेशिक सुप्रभातम् ॥

रामानुजो गुरुवरस्तवरञ्जितात्मा
रात्रिं दिवं मृदुवचांसि हृदि स्मरन् ते।
जागर्ति देव त इमेऽनुगता न चिन्त्यं
वेदान्तदेशिक ! कवीश्वर ! सुप्रभातम् ॥ 1 ॥

दुर्वादिनस्सपदि लोकविमोहनाय
जाग्रत्यकुण्ठगतयो विदिशासु दिक्षु।
तत्वावबोधनपटो कलमूलकादिन्
वेदान्तदेशिक ! कवीश्वर ! सुप्रभातम् ॥ 2 ॥

वेदान्तदेशिकपते विनिवेष्टुमीशः
श्रीमानसौ प्रयतते वृषशैलनाथः।
स त्वां अहंयुजनगर्वविमोचनाय
वेदान्तदेशिक ! कवीश्वर ! सुप्रभातम् ॥ 3 ॥

आबर्हणाय निगमान्तक जातमात्र
ब्राह्मण्यवत् वृषललोक कथाविधानाम्।
आस्ते विपाकसमयस्समयावनाय
वेदान्तदेशिक ! कवीश्वर ! सुप्रभातम् ॥ 4 ॥

स्वातन्त्र्यमीप्सति विभुस्त्वयि सर्वतन्त्रे -
ष्वीशः कवेरतनयातट नित्यवासी।
तल्लोकमान्यपदमण्डन भाग्यशालिन्
वेदान्तदेशिक ! कवीश्वर ! सुप्रभातम् ॥ 5 ॥

अम्भोज मध्यमपहाय हठात् रसज्ञां
इच्छत्यधिष्ठितुमसौ तव वाजिवक्त्रः।
पश्चात् सिताम्बुज विकासविधेः स्वकान्त्या
वेदान्तदेशिक ! कवीश्वर ! सुप्रभातम्॥ **6**॥

निर्वेष्टुमिच्छसि यथायथमाभिरूप्यं
देवस्य हस्तिशिखरिण्यनपायभिन्नम्।
सम्प्राप्त एष समयस्समुपासितुं तं
वेदान्तदेशिक ! कवीश्वर ! सुप्रभातम्॥ **7**॥

कल्लोलमालिनि कठोरकरोऽप्युदेति
श्रीमानसावुदित एव चकास्त्यनूरु।
ब्राह्मो मुहूर्त इह दैनिकपालनाय
वेदान्तदेशिक ! कवीश्वर ! सुप्रभातम्॥ **8**॥

पारम्यमैश्वरममेयमुपेयुषी सा
माता समस्तजगतां मधुवैरिपत्नी।
आशीर्भिराह्वयति पुत्रमनूनशक्तिं
वेदान्तदेशिक ! कवीश्वर ! सुप्रभातम्॥ **9**॥

कातर्यमाप्य कलुषीकृत नैजभावा
मोहान्धकारकुहरे मनुजा निमग्नाः।
कांक्षन्ति वक्त्र हरिताश्वमुदीक्षितैतुं
वेदान्तदेशिक ! कवीश्वर ! सुप्रभातम्॥ **10**॥

शुक्लोर्ध्वपुण्ड्रपरिचिह्नितफालभागाः
कालोपमाः कलुषयन्ति जगन्ति पालाः।
उन्मूल्य दुर्विलसितान्युपकर्तुमेषां
वेदान्तदेशिक ! कवीश्वर ! सुप्रभातम्॥ **11**॥

तत्त्वं विशिष्टमवबोधयितुं बुधानां
आशासते द्रमिडमुख्यमहानुभावाः।
श्रीलक्ष्मणार्य समयावनलब्धजन्मन्
वेदान्तदेशिक ! कवीश्वर ! सुप्रभातम् ॥ **12** ॥

द्वेधाविभक्त परिवैष्णव शास्त्रनिष्ठाः
स्वप्राधिकारभुवि यद्विशयं भजन्ते।
ग्रन्थं प्रणीतुमथ सज्जनसंभवाख्यं
वेदान्तदेशिक गुरो ! तव सुप्रभातम् ॥ **13** ॥

॥ इति श्रीमद्वेदान्तदेशिक सुप्रभातं समाप्तम् ॥